**Series SMA**

कोड नं. **22**
**Code No.**

रोल नं.
Roll No. | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **15** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (केन्द्रिकम्)
# SANSKRIT (Core)

*समय : होरात्रयम्* *पूर्णाङ्काः : 100*

*Time allowed : 3 hours* *Maximum Marks : 100*


www.examrace.com

निर्देशाः :

*सङ्केताभावे सर्वेषां प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि ।*

*जहाँ स्पष्ट संकेत नहीं हैं, वहाँ उत्तर संस्कृत में ही दीजिए ।*

*Answer the questions in Sanskrit only unless stated otherwise.*

*उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि ।*

*सभी उत्तर अलग दी गई उत्तर-पुस्तिका में लिखें ।*

*Answers should be written only in the separate answer-book provided.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | 10 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मककार्यम् (संस्कृत रचनात्मक कार्य) | 15 अङ्काः |
| SECTION B | (Sanskrit Writing Skills) | |
| खण्डः ग | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | 30 अङ्काः |
| SECTION C | (Applied Grammar) | |
| खण्डः घ | भाग I — पठितांश – अवबोधनम् (पठितांश – अवबोधन) | 35 अङ्काः |
| SECTION D | PART I — Reading Comprehension | |
| | भाग II — सामान्यः संस्कृतसाहित्यपरिचयः (सामान्य संस्कृत साहित्य-परिचय) | 10 अङ्काः |
| | PART II — General Introduction to Sanskrit Literature | |



www.examrace.com

## खण्डः क (SECTION A)

### अपठितांश – अवबोधनम्
### अपठितांश – अवबोधन
### Unseen Reading Comprehension *10*

1. अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्ननानाम् उत्तराणि संस्कृतेन लिखत :

निम्नलिखित गद्यांश को पढ़कर प्रदत्त प्रश्नों के उत्तर संस्कृत में लिखिए :

Read the following passage and answer the given questions in Sanskrit :

गद्यांशः

भारतभूमेः महिमा अनन्तः अवर्णनीयः च अस्ति । अद्यापि देवा भारतभूमौ जनितुम् इच्छन्ति । ते सदैव अस्मिन् विषये चिन्तयन्ति यत् कदा ते अक्षयस्य निर्मलस्य च पुण्यस्य कारणाद् भारते जनिष्यन्ते पुण्यमर्जित्वा च परमं पदं लप्स्यन्ते । नारदपुराणे महर्षिः सनकः नारदं सूचयति — "हे नारद ! योऽपि जीवः भारते जातः सन् विष्णोः आराधनायां संलग्नो भवति, तत्समः पुण्यात्मा त्रिषु लोकेषु अपि नास्ति । पुनश्च भारतरूपिणि कर्मस्थले फलम् अनिच्छन् शुभं कर्म कुर्वन् तद् विष्णवे समर्पयति स एव निर्मलः अनन्ते परमात्मनि एकरूपतां भजति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. $\frac{1}{2}\times4=2$

(i) कस्याः महिमा अनन्तः ?

(ii) किम् अर्जित्वा देवाः परमं पदं लप्स्यन्ते ?

(iii) कः परमात्मनि एकरूपतां भजति ?

(iv) के भारतभूमौ जनितुम् इच्छन्ति ?

(ब) पूर्णवाक्येन उत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. $1\times2=2$

(i) सनकः नारदं किं सूचयति ?

(ii) देवाः किं चिन्तयन्ति ?



www.examrace.com

(स) यथानिर्देशम् उत्तरत ।

निर्देशानुसार उत्तर दीजिए ।

Answer as directed. *1×4=4*

(i) 'अस्ति' क्रियायाः कर्तृपदं किम् ?

(ii) 'निर्मलस्य' इति पदस्य विशेष्यं किम् ?

(iii) 'मलिनः' अस्य विलोमपदं किम् ?

(iv) 'तद् विष्णवे समर्पयति' अत्र 'तद्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write a suitable title for this passage in Sanskrit. *2*

## खण्डः ख (SECTION B)

### संस्कृतेन रचनात्मककार्यम्

### संस्कृत रचनात्मक कार्य

### Sanskrit Writing Skills *15*

**2.** भवान् प्रखरः । भवन्मित्रं लोकेशः संस्कृत-लघुकथालेखनप्रतियोगितायां प्रथमं पुरस्कारं लब्धवान् । तं वर्धापयितुं लिखिते पत्रे रिक्तस्थानानि मञ्जूषापदसहायतया पूरयित्वा पत्रं पुनः लिखत ।

आप प्रखर हैं । आपके मित्र लोकेश ने संस्कृत लघुकथा-लेखन प्रतियोगिता में प्रथम पुरस्कार प्राप्त किया है । उसे बधाई देने के लिए लिखे गए पत्र को मञ्जूषा में दिए गये शब्दों की सहायता से पूरा करके पुनः लिखिए ।

You are Prakhara. Your friend Lokesh got First Prize in the competition of writing a short story in Sanskrit. In a letter written to congratulate him, fill in the blanks with the help of the words given in the box below and rewrite the same : $\frac{1}{2}\times 10=5$

**पत्रम्**

छात्रावासः,

मेरठमहाविद्यालयः,

मयराष्ट्रम्, उ.प्र. ।

दिनांकः ..................

प्रिय सखे ! (i) ____________

सप्रेम नमः । भवान् (ii) ____________ प्रथमं पुरस्कारं (iii) ____________ इति ज्ञात्वा मम चेतः (iv) ____________ हर्षं प्राप्तवान् । एतादृशीं प्रगतिं कृत्वा (v) ____________ संस्कृतभाषायाः प्रकृष्टः विद्वान् भूत्वा (vi) ____________ गत्वा संस्कृतस्य (vii) ____________

च प्रचारं करिष्यति इति आशासे । धन्यौ भवतः (viii) __________ यौ तुभ्यं (ix) __________ कर्तुं प्रेरितवन्तौ । तयोः कृते मम सादरं प्रणामाः । शीघ्रमेव अहं तव सकाशमागत्य पुनः त्वां वर्धापयिष्यामि ।

भवतः (x) __________ ,

सखा, प्रखरः ।

**मञ्जूषा**

| |
|---|
| संस्कृतेः, संस्कृतलघुकथालेखनप्रतियोगितायां, संस्कृताध्ययनम्, लब्धवान्, विदेशान्, भवान्, लोकेश !, महान्तम्, अभिन्नः, पितरौ । |

**3.** मञ्जूषाप्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत :
मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित लघुकथा में रिक्तस्थानों की पूर्ति कर कथा को पुनः लिखिए :
Complete the blanks of the following short story with the help of the words given in the box below and rewrite the same : $\frac{1}{2}\times 10=5$

<u>कथा</u>

गुरोः श्रीभक्तमालस्य समीपे एकः सत्पुरुषः (i) __________ प्रार्थयत्, "महाराज ! अहं सदैव परेभ्यः क्रुध्यामि । (ii) __________ समाप्तेः कमपि उपायं सूचय ।" महाराजः अवदत् — "सर्वप्रथमं तु अहम् एव यदि (iii) __________ भविष्यामि तदैव उपायं वदिष्यामि । अहं तु सर्वथा (iv) __________ न अस्मि ।" परं सत्पुरुषः गुरुचरणौ स्पृष्ट्वा क्रोधनाशस्य उपायं प्रष्टुं सुदृढः अभवत् । गुरुः उवाच — "यदहं कथयामि तत् करिष्यति भवान् ।" सत्पुरुषः (v) __________ प्रतिज्ञां कृतवान् । गुरुः अवदत् — "नित्यं प्रातः गौशालां गच्छ मौनः (vi) __________ गाः सेवस्व । गोः कण्ठं (vii) __________ स्पृश, गोः शिशुभिः (viii) __________ भवतः क्रोधः अवश्यमेव (ix) __________ भविष्यति । यतः गोसेवकः सदैव (x) __________ भवति ।"

**मञ्जूषा**

| |
|---|
| शान्तः, अक्रोधी, आगत्य, निर्विकारः, तत्कर्तुम्, सन्, सस्नेहम्, शीलवान्, सह, क्रोधस्य । |

4. मञ्जूषायां लिखितपदानां सहायतया **पञ्च**संस्कृतवाक्येषु 'योगस्य महत्त्वं' इति विषयम् अधिकृत्य वर्णनं कुरुत ।

मञ्जूषा में लिखित पदों की सहायता से 'योगस्य महत्त्वम्' इस विषय का वर्णन **पाँच** संस्कृत वाक्यों में कीजिए ।

With the help of the words given in the box below, describe 'योगस्य महत्त्वम्' (importance of yoga) in Sanskrit in **five** sentences. *1×5=5*

**मञ्जूषा**

| |
|---|
| शान्तिः, सुखम्, प्राप्यते, अनुभूयते, शक्नुमः, वयम्, प्राप्नुमः, मनसः, देहस्य, वृद्धिः, आयुषः, परोपकारस्य, उदेति, भावना, जनाः, लभन्ते । |

## खण्डः ग (SECTION C)

### अनुप्रयुक्तव्याकरणम्

### अनुप्रयुक्त व्याकरण

### Applied Grammar *30*

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कुरुत :

निम्नलिखित वाक्यों में रेखांकित पदों का सन्धि-विच्छेद कीजिए :

Disjoin Sandhis in the underlined words of the following sentences : *1×6=6*

(i) भूतान्यात्मन्येवानुपश्यति ।

(ii) धन्य एष कुलमूलं रामचन्द्रस्य ।

(iii) अस्मद्वचनात् आघोषितः ।

(iv) निघर्षणच्छेदनतापताडनैः ।

(v) ममार्थाः क्षीणा जाताः ।

(vi) परैरपि कृतं तत्तस्य सम्भाव्यते ।



www.examrace.com

6. अधोलिखितवाक्येषु रेखाङ्कितसमस्तपदानां विग्रहा लेख्याः :

निम्नलिखित वाक्यों में रेखांकित समस्त पदों के विग्रह लिखिए :

Expound the underlined words of the following sentences : *1×6=6*

(i) येनाक्रमन्त्यृषयो ह्याप्तकामाः ।

(ii) दीपकः ब्रह्माण्डभाण्डस्य ।

(iii) अनभियुक्तानां राज्ञां दोषाः भवन्ति ।

(iv) कृतप्रयत्नोऽपि गृहे न जीवति ।

(v) कक्षायां यथास्थानम् उपविशन्ति ।

(vi) अहोरात्रम् आकण्ठम् अशित्वा ।

7. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत-प्रकृतिप्रत्ययान् योजयित्वा रिक्तस्थानानि पूरयत :

निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय को जोड़कर रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks in the following sentences by adding suffixes to the roots and words given in the brackets : *1×8=8*

(i) ___________ वरान् निबोधत । (प्र + आप् + क्त्वा)

(ii) वेदाः एतस्य ___________ । (वन्द् + इन्)

(iii) कौमुदीमहोत्सवः न ___________ । (प्र + आ + रभ् + क्त)

(iv) शिष्येण गुरोः आज्ञा ___________ । (पाल् + अनीयर्)

(v) प्रयोजनं ___________ इच्छसि । (श्रु + तुमुन्)

(vi) ___________ मत्स्यजीविभिः उक्तम् । (गम् + शतृ)

(vii) रोचकं ___________ नासीत् । (साहस + ठक्)

(viii) ___________ प्रेक्षकान् आकर्षति । (भव्य + तल्)



www.examrace.com

**8.** अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् :

निम्नलिखित वाक्यों में कर्ता एवं क्रिया पदों की अन्विति कीजिए :

Write the suitable verb according to the subject in the following sentences : *1×5=5*

(i) कथं ___________ मया सह राक्षसः ? (स्पर्धेते, स्पर्धते) ।

(ii) न ___________ विद्वांसः । (पश्यति, पश्यन्ति) ।

(iii) धवला गिरयः अतीव ___________ । (शोभते, शोभन्ते)

(iv) यस्मिन् सप्तसप्ततिः कक्षाः ___________ । (सन्ति, स्तः)

(v) किमपि ___________ भवती । (ब्रुवन्तु, ब्रवीतु)

**अथवा (OR)**

अधोलिखितेषु वाक्येषु विशेष्यैः सहमञ्जूषायाः विशेषणपदानि योजयत :

निम्नलिखित वाक्यों में विशेष्यों के साथ मञ्जूषा से विशेषण पदों को जोड़िए :

Add the appropriate adjectives from the box, with their qualifying nouns in the following sentences : *1×5=5*

(i) सत्येन पन्था विततो ___________ ।

(ii) प्रेक्षकाणां ___________ चक्षुषो विषयः ।

(iii) बौद्धधर्मस्य ___________ स्तूपः ।

(iv) ___________ मनः, तीर्थेन किम् ?

(v) न ___________ श्रियम् अनुशोचामि ।

**मञ्जूषा**

| |
|---|
| रमणीयः, प्राचीनः, देवयानः, नष्टाम्, शुचि । |

**9.** अधोलिखितेषु वाक्येषु कोष्ठकप्रदत्तशब्दैः सह उपयुक्तां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत :

निम्नलिखित वाक्यों में कोष्ठक में दिए गए शब्दों में उपयुक्त विभक्ति का प्रयोग कर रिक्तस्थानों की पूर्ति कीजिए :

Fill in the blanks using appropriate case-endings (विभक्ति) with the words given in the brackets in the following sentences : *1×5=5*

(i) अये ___________ अध्यास्ते वृषलः । (सिंहासन)

(ii) ___________ गुरोः आज्ञा पालनीया । (शिष्य)

(iii) ___________ प्रति भक्तिभावं दर्शयन्ति । (बुद्ध) ।

(iv) पिशुनता यद्यस्ति किम् ___________ । (पातक)

(v) ___________ समम् अन्यत्र गच्छामि । (पारावत)



www.examrace.com

## खण्डः घ (SECTION D)

### भाग I
### (PART I)
### पठितांश – अवबोधनम्
### पठितांश – अवबोधन
### Reading Comprehension

35

**10.** अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत :
निम्नलिखित गद्यांश, पद्यांश तथा नाट्यांश को पढ़कर उन पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following prose, poetry, drama passages and answer the questions based on them in Sanskrit :

(क) गद्यांशः

वयं वर्तमानकाले सङ्गणकस्य प्रयोगं कुर्मः, परन्तु यदि आर्यभटेन शून्यस्य आविष्कारः न कृतः स्यात् तर्हि संगणकभाषाया जन्म एव न अभविष्यत्, यतः तत्र तु एकं शून्यञ्च द्वे एव संख्ये महत्त्वपूर्णे । अपि च सूर्यं प्रति पूर्वाभिमुखी पृथिवी 365·25 वारं प्रतिवर्षं भ्रमति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2}\times2=1$

(i) वयं वर्तमानकाले कस्य प्रयोगं कुर्मः ?

(ii) आर्यभटेन कस्य आविष्कारः कृतः ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. 1

के संख्ये महत्त्वपूर्णे ?

(स) यथानिर्देशम् उत्तरत ।
निर्देशानुसार उत्तर दीजिए ।
Answer as directed.

(i) 'भूत' इति पदस्य किं विलोमपदमत्र ? $\frac{1}{2}$

(ii) 'भानुम्' अस्य कः पर्यायः अत्र प्रयुक्तः ? $\frac{1}{2}$

(iii) 'पृथिवी' अस्य कर्तृपदस्य क्रियापदं किम् ? 1

(iv) 'पूर्वाभिमुखी' इति कस्याः संज्ञायाः विशेषणम् ? 1


www.examrace.com

(ख) पद्यांशः

सत्यं न मे धनविनाशगता विचिन्ता,
भाग्यक्रमेण हि धनानि पुनर्भवन्ति ।
एतत्तु मां दहति नष्टधनश्रियो मे
यत् सौहृदानि सुजने शिथिलीभवन्ति ।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2}\times2=1$

(i) कानि पुनः भवन्ति ?
(ii) सुजने कानि शिथिलीभवन्ति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *1*

धनानि कथं पुनर्भवन्ति ?

(स) यथानिर्देशम् उत्तरत ।
निर्देशानुसार उत्तर दीजिए ।
Answer as directed.

(i) 'विचिन्ता' इति पदस्य विशेषणं किम् ? $\frac{1}{2}$
(ii) 'दुर्जने' इति पदस्य विलोमपदं किम् ? $\frac{1}{2}$
(iii) 'मे' इति सर्वनामपदं कस्मै प्रयुक्तम् ? *1*
(iv) 'भवन्ति' इति क्रियापदस्य कर्तृपदं किम् ? *1*

(ग) नाट्यांशः

*चाणक्यः* — वृषल ! किमर्थं वयम् आहूताः ?
*राजा* — आर्यस्य दर्शनेन आत्मानम् अनुग्रहीतुम् ।
*चाणक्यः* — अलम् अनेन विनयेन । न निष्प्रयोजनं प्रभुभिः आहूयन्ते अधिकारिणः ।
*राजा* — आर्य ! कौमुदीमहोत्सवस्य प्रतिषेधे किं फलम् आर्यः पश्यति ?
*चाणक्यः* — (स्मितं कृत्वा) उपालब्धुं तर्हि वयम् आहूताः ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2}\times2=1$

(i) वृषलेन कः आहूतः ?
(ii) प्रभुभिः अधिकारिणः कथं न आहूयन्ते ?



www.examrace.com

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *1*
कस्य दर्शनेन राजा आत्मानम् अनुग्रहीतुम् इच्छति ?

(स) यथानिर्देशम् उत्तरत ।
निर्देशानुसार उत्तर दीजिए ।
Answer as directed.

(i) 'स्वीकारे' अस्य किं विलोमपदमत्र ? $\frac{1}{2}$

(ii) 'वृथा' इत्यर्थे किं पदमत्र प्रयुक्तम् ? $\frac{1}{2}$

(iii) अस्मिन् नाट्यांशे 'वयम्' इति सर्वनाम कस्मै प्रयुक्तम् ? *1*

(iv) 'आर्यः' अस्य कर्तुः का क्रिया अत्र प्रयुक्ता ? *1*

**11.** यथानिर्देशम् प्रश्नौ उत्तरत :
निर्देशानुसार दोनों प्रश्नों के उत्तर दीजिए :
Answer both the questions as directed : *2+2=4*

(i) 'अहो राजते कीदृशीयं हिमानी' अस्मिन् पाठे कस्य विषयस्य वर्णनम् अस्ति ?

(ii) "'दानं श्रेयस्करम्' इति प्रत्ययादेव ममार्थाः क्षीणा जाताः" इति वाक्यं कः कं कथयति ?

**12.** प्रत्येकम् अंशस्य प्रदत्तभावार्थ**त्रयात्** शुद्धं भावार्थं चित्वा लिखत :
प्रत्येक अंश के लिए दिए गए **तीन** भावार्थों में से शुद्ध भावार्थ का चयन कर लिखिए :

Pick out and write the correct one out of the **three** explanations given each of the following lines : *2+2=4*

(अ) सत्यमेव जयति नानृतम् ।

भावार्थः

(i) संसारे सर्वकार्याणि असत्यपालनेन सिध्यन्ति ।
(ii) यदि मानवः जेतुमिच्छति तर्हि सत्यं धारयेत् ।
(iii) सर्वाणि कार्याणि सत्येन पूर्यन्ते नासत्येन ।

(ब) अपयशो यद्यस्ति किं मृत्युना ?

भावार्थः

(i) ये जनाः जीवने अपकीर्तिं लभन्ते ते मृता एव भवन्ति ।
(ii) मानवाः जीवने कदापि दुष्कार्याणि न कुर्वन्तु ।
(iii) ये प्राणिनः अपयशोऽर्जयन्ति ते न जीवन्ति ।

**अथवा (OR)**


www.examrace.com

अधोलिखितस्य पद्यस्य प्रदत्तं भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत :
निम्नलिखित पद्य के दिए गए भावार्थ को मञ्जूषा में दिए गए शब्दों से पूर्ण करके पुनः लिखिए :
Complete the central idea of the given verse with the words given in the box below and rewrite the same : *1×4=4*

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥

भावार्थः

ये जनाः सदाशयाः (i) ___________ तेषां गृहे आगतेभ्यः (ii) ___________ आसनम्, स्थानं (iii) ___________ चतुर्थी च मधुरा (iv) ___________ कदापि न समाप्यन्ते ।

**मञ्जूषा**

| वाणी, अतिथिभ्यः, भवन्ति, जलम् । |
|---|

**13.** अधोलिखितस्य श्लोक**द्वयस्य** प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा अन्वयं पुनः लिखत :
निम्नलिखित **दो** श्लोकों के दिए गए अन्वयों में रिक्तस्थानों की पूर्ति कर पुनः लिखिए :
The prose-order-renderings of the following **two** verses have been given below. Fill in the blanks and rewrite the same : $\frac{1}{2}\times8=4$

(अ) पद्यांशः

विद्यमाना गतिः येषामन्यत्रापि सुखावहा ।
ते न पश्यन्ति विद्वांसो देहभंगं कुलक्षयम् ॥

अन्वयः

येषाम् अन्यत्र (i) ___________ विद्यमाना सुखावहा (ii) ___________ ते विद्वांसः (iii) ___________ कुलक्षयं न (iv) ___________ ।

(ब) पद्यांशः

वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः ।
करणं परोपकरणं येषां केषां न ते वन्द्याः ॥

अन्वयः

येषाम् (i) ___________ प्रसादसदनम् (ii) ___________ सदयम् वाचः सुधामुचः । (iii) ___________ परोपकरणम् ते (iv) ___________ न वन्द्याः ।

**मञ्जूषा**

| वदनम्, अपि, हृदयम्, पश्यन्ति, करणम्, गतिः, देहभंगम्, केषाम् । |
|---|

**14.** अधोलिखितानां 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह सार्थकसम्मेलनं कृत्वा वाक्यानि पुनः लिखत :

निम्नलिखित 'क' स्तम्भ के वाक्यांशों का 'ख' स्तम्भ के वाक्यांशों के साथ सार्थक मिलान कर वाक्यों को पुनः लिखिए :

Match the sentences of column 'क' with the suitable sentences of column 'ख' and rewrite the same : *1×4=4*

| 'क' | 'ख' |
|---|---|
| (i) राज्यं हि नाम नृपस्य कृते | (अ) नान्या तेषां गतिर्भवेत् । |
| (ii) आश्रितव्यः अथवा दुर्गः | (ब) त्यागेन शीलेन गुणेन कर्मणा । |
| (iii) एको हि दोषो गुणसन्निपाते | (स) महत् कष्टदायकम् । |
| (iv) तथा चतुर्भिः पुरुषः परीक्ष्यते | (द) निमज्जतीन्दोः किरणेष्विवांकः । |

**15.** अधोलिखितेषु वाक्येषु रेखांकितशब्दानां प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत :

निम्नलिखित वाक्यों में रेखांकित शब्दों के प्रसङ्गानुसार सार्थक अर्थ चुनकर लिखिए :

Select and write the appropriate meanings of the underlined words according to the context : *1×4=4*

(अ) एष एव <u>अङ्गीकरोति</u> परार्द्धसंख्याम् ।
- (i) स्वीकरोति
- (ii) प्राप्नोति
- (iii) आच्छादयति

(ब) अयमेव <u>वत्सरं</u> द्वादशसु भागेषु विभनक्ति ।
- (i) दिनम्
- (ii) रात्रिम्
- (iii) वर्षम्

(स) सत्येन <u>पन्थाः</u> विततो देवयानः ।
- (i) आकाशः
- (ii) मार्गः
- (iii) पृथिवी

(द) सुरक्षितं <u>दैवहतं</u> विनश्यति ।
- (i) समयः
- (ii) भाग्यम्
- (iii) परिश्रमः


www.examrace.com

## खण्डः घ (SECTION D)
## भाग II
## (PART II)

### सामान्यः संस्कृतसाहित्यपरिचयः
### सामान्य संस्कृत साहित्य-परिचय
### General Introduction to Sanskrit Literature 10

**16.** अधोलिखितानां कवीनां देश-काल-कृतीनां यथानिर्देशं नामानि लिखत :

निम्नलिखित कवियों के देश, काल एवं कृतियों का निर्देशानुसार नाम लिखिए :

Write about the place, date and works of the following poets as directed : 3+3+4=10

कवयः

(अ) (i) विष्णुशर्मा
(ii) भासः
(iii) विशाखदत्तः
} देशः

(ब) (i) मनुः
(ii) चाणक्यः
(iii) भारविः
} कालः

(स) (i) भवभूतिः
(ii) वराहमिहिरः
(iii) आर्यभटः
(iv) अम्बिकादत्तव्यासः
} कृतिः

**अथवा (OR)**

(अ) अधोलिखितवाक्येषु मञ्जूषायाः पदानि चित्वा रिक्तस्थानपूर्तिः क्रियताम् :

निम्नलिखित वाक्यों में मञ्जूषा में दिए गए पदों को चुनकर रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks with the help of the words given in the box in the following sentences : $\frac{1}{2}\times 10=5$

(i) अश्वघोषः ____________ रचयिता अस्ति ।

(ii) गद्यकाव्यस्य प्रमुखौ भेदौ स्तः ____________ आख्यायिका च ।


www.examrace.com

(iii) ____________ अभावः मुद्राराक्षसे अस्ति ।

(iv) प्रकरणे ____________ अङ्काः भवन्ति ।

(v) मेघदूतम् एकम् ____________ अस्ति ।

(vi) गद्यपद्यमयी रचना ____________ कथ्यते ।

(vii) भासः ____________ रचनाः अरचयत् ।

(viii) नीतिशतकम् ____________ रचना अस्ति ।

(ix) प्राचीनतमवैद्यस्य नाम ____________ अस्ति ।

(x) कालिदासः ____________ नाटकानि अरचयत् ।

**मञ्जूषा**

| |
|---|
| कथा, त्रीणि, त्रयोदश, नायिकायाः, चरकः, दश, चम्पूः, बुद्धचरितस्य, खण्डकाव्यम्, भर्तृहरेः । |

(ब) पद्यकाव्यस्य का अपि **पञ्च** विशेषताः संस्कृतेन लिखत ।

पद्य काव्य की किन्हीं **पाँच** विशेषताओं को संस्कृत में लिखिए ।

Write any **five** characteristics of poetry in Sanskrit.



www.examrace.com